स्था ग्रहास्ते तेषां तत्कालिकारयो भवन्ति तएव ग्रहा यदि नैसर्गिकरिपवस्तदा अधिशत्रवः नैसर्गिकसमास्चेत् रिपवः, इति भेदः। यथोक्तं हितसमरिपुसंज्ञा ये निसर्गे निरुक्ताः अधिहितहितमध्यास्तेऽपि तत्कालमित्रैः। रिपुसमसुहृदाख्या ये निसर्गोपदिष्टा अधिरिपुरिपुमध्याः शत्रुभिश्चिन्तनीयाः इतिराजमा०। निसर्गसमास्च "बुधःकुजेज्यास्फुजिदर्कपुत्राः शुक्रार्कजौ, भौमसुरेज्यमन्दाः, । शनिः, कुजेज्यौ, सुरराजमन्त्री रव्यादितोऽमी समसंज्ञिताः स्युः" इत्युक्ताः यथा रवेः बुधः, चन्द्रस्य कुजगुरुशुक्रशनयः। कुजस्य शुक्रशनी, बुधस्य कुजगुरुशनयः। गुरोः शनिः, शुक्रस्य कुजगुरू शनेः गुरुः, एतेषां क्रमेणैते समास्त एव समा अपि तात्कालिकरिपवस्चेत् रिपव इति अवगन्तव्यम्। एतेषां वलज्ञानार्थं तत्तत् संज्ञा तथाहि अधिमित्रगृहे २२।३०कला बलम् मित्रगृहे १५ कलाः, समगृहे ११।४५कलाः शत्रुगेहे ७।३ कलाः अधिशत्रुगृहे ३।४५ कलाबलम्। मूलं जातकादौ दृश्यम्। नैसर्गिकरिपुता तु सर्वकार्य्यमात्रे इति भेदः। एतच्च जातोक्तग्रहादिबलज्ञानोपयोगि। ताजके तु "दृष्टिः स्यान्नमपञ्चमे बलवती प्रत्यक्षतः स्नेहदा पादोना (४५कलाः) ऽखिलकार्य्यसाधनकरी मेलापकाख्योच्यते। गुप्तस्नेहकरी तृतीयभवने कार्य्यस्य संसिद्धिदा त्र्यंशोना कथिता (४०कलाः) तृतीयभवने षड्भागदृष्टिर्भवे (१०कलाः)। दृष्टिः पादमिता (१५कलाः) चतुर्थदशमे गुप्तारिभावा स्मृताऽन्योन्यं सप्तमभे तथैकभवने प्रत्यक्षवैराखिला" (६०कलाः) इति दृष्टिविशेषमभिधाय "पश्यन्मित्रदृशा (३,५,६,११,) सुहृत्, रिपुदृशा (१,४,७,१०,) शत्रुः। समस्त्वन्यथा २,६,८,१२, इति नील०उक्तादिशा तात्कालिकमित्रादि। तेन स्थापेक्षया १,४,७,१०, स्थानस्था ग्रहाः रिपवः। तत्र "स्वस्वाधिकारोक्तबलं सुहृद्भे पादोनमर्द्धं समभेऽरिभेऽङ्घ्रिः": नील०। राहोर्निसर्गरिपवस्तु "सूर्य्यःशशाङ्को धरणीसुतस्च राहो रिपुः"इत्युक्ता ज्ञेयाः। तत्कालिकास्तु प्रागुक्तादिशा ज्ञेयाः केतोस्तु "शुक्रशनो विपक्षौ" इत्युक्तौ ज्ञेयौ। जातके षष्ठस्थाने "षष्ठे च क्षतविद्विषौ" इत्युक्तौ चिन्तनीयौ। ताजके तु "रिपौ मातुलमान्द्यारिचतुष्पाद्बन्धनीव्रणाः" इति नील० ताजकोक्ताः चिन्तनीयाः। ८ तन्त्रोक्ते मन्त्रभेदे। तथाहि षोडशकोष्ठात्मके सिद्धादिचक्रे चतुस्चतुःकोष्ठादिक्रमेण सिद्धः, साध्यः सुसिद्धः अरिरिति संज्ञा। तत्रापि तेषु चतुःकोष्ठात्मकेषु प्रत्येकं चतुर्थं कोष्ठमपि अरिसंज्ञं तथा च पञ्चमकोष्ठं सप्तमकोष्ठं त्रयोदशकोष्ठं एकादशंकोष्ठम् द्वादशं पञ्चदशं कोष्ठं षोड़शं चेति सप्तकमरिसंज्ञं तस्यारिसंज्ञकत्वात् तत्रस्थवर्णा अप्यरिसंज्ञाः। षोड़शकोष्ठस्थवर्णेषु मध्ये साधकनामाक्षरं यत्र तिष्ठति तस्यैवादित्वं प्रकल्प्य दक्षिणावर्त्तेन सर्व्वत्र चतुर्षु चतुःकोष्ठात्मकेषु गणना तथा च प्रथमादिकोष्ठस्याक्षरादिको मन्त्रः सिद्धादिनामभाक्। यथा आद्यकोष्ठचतुष्टये प्रथमे १सिद्धसिद्धः २ द्वितीये सिद्धसाध्यः। तृतीये ३सिद्धसुसिद्धः ४ चतुर्थे सिद्धारिः। द्वितीयकोष्ठचतुष्के आद्ये साध्यसिद्धः द्वितीये साध्यसाध्यः। तृतीये साध्यसुसिद्धः चतुर्थे साध्यारिः। तृतीयकोष्ठचतुष्टये आद्ये सुसिद्धसिद्धः द्वितीये सुसिद्धसाध्यः। तृतीये सुसिद्धसुसिद्धः चतुर्थे सुसिद्धारिः। चतुर्थकोष्ठचतुष्के आद्ये अरिसिद्धः। द्वितीये अरिसाध्यः तृतीये अरिसुसिद्धः चतुर्थे अर्य्यरिरिति गणना। एतच्च प्रदर्शनमात्रमुक्तम् किन्तु सर्व्वत्र यत्र कोष्ठे साधकनामाक्षरं तदारभ्यैव गणना तथाच साधकनामाक्षरं यत्र तिष्ठति तत्कोष्ठस्यैवादित्वं प्रकल्प्य दक्षिणावर्त्तेन गणने मन्त्राक्षरं यत्र तिष्ठति तत्पर्य्यन्तगणनायां सिद्धादिषोड़शसंज्ञा तथा च ३८ पृष्ठे दर्शिताऽकथहचक्रानुसारेण प्रथमादिसंज्ञा साधकनामाक्षरादिकल्पनयैव। ततस्च सिद्धादिचक्रस्थकोष्ठानां प्रथमादिसंख्या या उक्ता सा न नियता अकथहचक्रशब्दे तन्मूलं दृश्यम्।"अरिमन्त्रं न गृह्णीयादिति"तन्त्रम्। राज्ञो विषयानन्तरस्थे ६ नृपतौ। स च द्वादशराजचक्रमध्ये आदिभूतः यथोक्तं माघ २,८१ स्लोकव्याख्यायां मल्लि०। "अरिमित्रमरेर्मित्रं मित्रमित्रमतः परम्। अरिमित्रस्य मित्रञ्च विजिगीषोः पुरस्सराः" पञ्चेति शेषः "पार्ष्णिग्राहस्ततः पश्चादाक्रन्दस्तनन्तरम्। आसारावनयोस्चैव विजिगीषोस्तु पृष्ठतः" पार्ष्णिग्राहासारः आक्रन्दासारस्चेति चत्वार इति शेषः एवं नव भवन्ति विजिगीषुर्दशमः ":अरेस्च विजिगीषोस्च मध्यमो भूम्यनन्तरः। अनुग्रहे संहतयोः समर्थोव्यस्तयोर्बधे। मण्डलाद्बहिरेतेषामुदासीनो बलाधिकः" इति मध्यमोदासीनाभ्यां सह द्वादश इति। अरये साधु तस्मै हितं वा यत्। अराय्यं तत्र साध्वादौ त्रि० "असौ यो अधरादृगृहस्तत्र सन्त्वराय्यः" अथ० २,१४,३,। १० प्रेरके त्रि० अरिष्टुतशब्दे उदा०।

**अरिक्थभाज्** त्रि० रिक्थं पित्रादिदायं न भजते भज—ण्वि अस०स०। दायाग्राहिणि अनंशे क्लीवपतितादौ अनंशशब्दे १४३ पृष्ठेऽस्य विवरणम्।